# Praise of Rama by Jatayu from Adhyatma Ramayana

# શ્રીરામસ્તુતિઃ જટાયુપ્રોક્તા અધ્યાત્મરામાયણે

## Document Information

Text title : rAmastuti 4 jaTAyuproktam adhyAtmarAmayaNe

File name : rAmastutijaTAyuproktamAdhyatmaRamayana.itx

Category : raama, stotra

Location : doc_raama

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : July 10, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 1, 2024

*sanskritdocuments.org*

Praise of Rama by Jatayu from Adhyatma Ramayana

# શ્રીરામસ્તુતિઃ જટાયુપ્રોક્તા અધ્યાત્મરામાયણે

અગણ્યગુણમાદ્યમવ્યયમપ્રમેય-
    મખિલજગત્સૃષ્ટિસ્થિતિસંહારમૂલમ્ ।
પરમં પરાપરમાનન્દં પરાત્માનં
    વરદમહં પ્રણતોઽસ્મિ સન્તતં રામમ્ ॥ ૧॥
મહિતકટાક્ષવિક્ષેપિતામરશુચં
    રહિતાવધિસુખમિન્દિરામનોહરમ્ ।
શ્યામલં જટામકુટોજ્જ્વલં ચાપશર-
    કોમલકરાંબુજં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૨॥

ભુવનકમનીયરૂપમીડિતં શત-
    રવિભાસુરમભીષ્ટપ્રદં શરણદમ્ ।
સુરપાદમૂલરચિતનિલયં
    સુરસઞ્ચયસેવ્યં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૩॥

ભવકાનનદવદહનનામધેયં
    ભવપઙ્કજભવમુખદૈવતં દેવમ્ ।
દનુજપતિકોટિસહસ્રવિનાશં
    મનુજાકારં હરિં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૪॥

ભવભાવનાહરં ભગવત્સ્વરૂપિણં
    ભવભીવિરહિતં મુનિસેવિતં પરમ્ ।
ભવસાગરતરણાંઘ્રિપોતકં નિત્યં
    ભવનાશાયાનિશં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૫॥

ગિરિશગિરિસુતાહૃદયાંબુજાવાસં
    ગિરિનાયકધરં ગિરિપક્ષારિસેવ્યમ્ ।
સુરસઞ્ચયદનુજેન્દ્રસેવિતપાદં
    સુરપમણિનિભં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૬॥

પરદારાર્થપરિવર્જિતમનીષિણાં
    પરપૂરુષગુણભૂતિસન્તુષ્ટાત્મનામ્ ।
પરલોકૈકહિતનિરતાત્મનાં સેવ્યં
    પરમાનન્દમયં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૭॥

સ્મિતસુન્દરવિકસિતવક્ત્રાંભોરુહં
    સ્મૃતિગોચરમસિતાંબુદકલેવરમ્ ।
સિતપઙ્કજચારુનયનં રઘુવરં
    ક્ષિતિનન્દિનીવરં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૮॥

જલપાત્રૌઘસ્થિતરવિમણ્ડલસમં
    સકલચરાચરજીવાન્તઃસ્થિતમ્ ।
પરિપૂર્ણાત્માનમદ્વયમવ્યયમેકં
    પરમં પરાપરં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૯॥

વિધિમાધવશમ્ભુરૂપભેદેન ગુણ-
    ત્રિતયવિરાજિતં કેવલં વિરાજન્તમ્ ।
ત્રિદશમુનિજનસ્તુતમવ્યક્તમજં
    ક્ષિતિજામનોહરં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૧૦॥

મન્મથશતકોટિસુન્દરકલેવરં
    જન્મનાશાદિહીનં ચિન્મયં જગન્મયમ્ ।
નિર્મલં જન્મકર્માધારમપ્યનાધારં
    નિર્મમમાત્મારામં પ્રણતોઽસ્મ્યહં રામમ્ ॥ ૧૧॥

ઇતિ અધ્યાત્મરામાયણે જટાયુપ્રોક્તા શ્રીરામસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by PSA Easwaran

*Praise of Rama by Jatayu from Adhyatma Ramayana*

pdf was typeset on September 1, 2024

Please send corrections to *sanskrit@cheerful.com*